**Series &RQPS**

**Set-4**

प्रश्न-पत्र कोड
Q.P. Code **49**

रोल नं.
Roll No. | | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम् (ऐच्छिकम्)
# SANSKRIT (Elective)

*समयः : होरात्रयम्* — *पूर्णाङ्काः : **80***

*निर्धारित समय : **3** घण्टे* — *अधिकतम अंक : **80***

*Time allowed : **3** hours* — *Maximum Marks : **80***

| | नोट | | NOTE |
|---|---|---|---|
| (I) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं । | (I) | Please check that this question paper contains **19** printed pages. |
| (II) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में **19** प्रश्न हैं । | (II) | Please check that this question paper contains **19** questions. |
| (III) | प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें । | (III) | Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (IV) | **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।** | (IV) | **Please write down the serial number of the question in the answer-book before attempting it.** |
| (V) | इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे । | (V) | 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period. |

***General Instructions :***

*Questions paper is divided into 5 sections.*

*It has total **19** questions.*

***Section A** – 1 Question no. 1 to 1*

***Section B** – 2 Questions no. 2 to 3*

***Section C** – 5 Questions no. 4 to 8*

***Section D** – 9 Questions no. 9 to 17*

***Section E** – 2 Questions no. 18 to 19*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

***सामान्य निर्देशा:***

*अस्मिन् प्रश्नपत्रे **पञ्च** खण्डाः सन्ति ।*

*अस्मिन् प्रश्नपत्रे नवदश **(19)** प्रश्नाः सन्ति ।*

***खण्डः 'क'** – 1 – प्रश्नसंख्या 1*

***खण्डः 'ख'** – 2 – प्रश्नसंख्या 2 – 3*

***खण्डः 'ग'** – 5 – प्रश्नसंख्या 4 – 8*

***खण्डः 'घ'** – 9 – प्रश्नसंख्या 9 – 17*

***खण्डः 'ङ'** – 2 – प्रश्नसंख्या 18 – 19*

*विशिष्टनिर्देशानुसारं प्रश्नाः समाधेयाः ।*

*उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया ।*

## खण्डः 'क'

**अपठित-अवबोधनम्** *10 अङ्काः*

**अपठित अवबोधन**

**Unseen Reading Comprehension**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following passage and answer the given questions in Sanskrit.

स्वतन्त्रताप्राप्तेः अनन्तरं देशे विज्ञानस्य प्रगत्यर्थम् अन्तरिक्षशोधक्षेत्रे अनुसन्धानस्य महती आवश्यकता भारतीयवैज्ञानिकैः अनुभूता । भारतस्य आधुनिक-अंतरिक्ष-अनुसन्धान-कार्यक्रमस्य जनकः आसीत् – डा. विक्रमसाराभाई । भारतसर्वकारेण डा. विक्रमसाराभाई-महोदयस्य अध्यक्षतायां 1969 तमे वर्षे भारतीय-अंतरिक्ष-अनुसन्धान-संगठनस्य (ISRO) स्थापना कृता । अस्य संगठनस्य सुयोग्याः वैज्ञानिकाः विश्वे भारतस्य प्रतिष्ठायै दिवानिशम् अनुसन्धानकार्ये संलग्नाः सन्ति । संगठनेन अनेन अनेकानि अंतरिक्षयानप्रक्षेपणानि सफलतापूर्वकं कृतानि । भारतीयानां वैज्ञानिकानां परिश्रमस्य परिणामोऽयं यत् 2023 तमे वर्षे संगठनेन प्रक्षेपितं चन्द्रयानं सफलतापूर्वकं चन्द्रमसं प्राप्तम् । विश्वे भारतं प्रथमः देशः यस्य चन्द्रयानं चन्द्रमसः दक्षिणध्रुवं सम्प्राप्तम् । भारतीयाः वैज्ञानिकाः सर्वथा वन्दनीयाः प्रशंसनीयाः च सन्ति । भारतस्य नागरिकाः भारतीयवैज्ञानिकान् प्रति गर्विताः सन्ति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) *2×1=2*

(i) अन्तरिक्ष-अनुसंधान-कार्यक्रमस्य जनकः कः आसीत् ?

(ii) के अनुसन्धानकार्ये दिवानिशम् संलग्नाः सन्ति ?

(iii) भारतसर्वकारेण 1969 तमे वर्षे कस्य स्थापना कृता ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×2=4*

(i) देशे विज्ञानस्य प्रगत्यर्थं वैज्ञानिकैः कस्य आवश्यकता अनुभूता ?

(ii) संगठनस्य वैज्ञानिकाः किं कुर्वन्ति ?

(iii) संगठनेन प्रक्षेपितं चन्द्रयानं कुत्र अगच्छत् ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit. *1×1=1*

(ई) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)
निर्देशानुसार उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)
Choose the appropriate answer and write as directed. *3×1=3*

(i) 'वैज्ञानिकाः दिवानिशम् अनुसन्धानकार्ये संलग्नाः सन्ति ।' अत्र 'सन्ति' इति क्रियापदस्य कर्तृपदं किम् ?
(A) दिवानिशम्
(B) वैज्ञानिकाः
(C) संलग्नाः
(D) अनुसंधानकार्ये

(ii) 'संगठनस्य सुयोग्याः वैज्ञानिकाः दिवानिशम् अनुसन्धानकार्ये संलग्नाः सन्ति ।' अत्र किं विशेषणपदम् ?
(A) सुयोग्याः
(B) वैज्ञानिकाः
(C) संलग्नाः
(D) संगठनस्य

(iii) 'विश्वे भारतं प्रथमः देशः यस्य चन्द्रयानं चन्द्रमसः दक्षिणध्रुवं सम्प्राप्तम् ।' अत्र 'संसारे' इति पदस्य पर्यायपदं किम् ?
(A) भारतम्
(B) चन्द्रयानं
(C) विश्वे
(D) चन्द्रमसः

(iv) 'भारतस्य नागरिकाः भारतीयवैज्ञानिकानां विषये गर्विताः सन्ति ।' अत्र 'नागरिकाः' इति कर्तृपदस्य क्रियापदं किम् ?
(A) विषये
(B) गर्विताः
(C) सन्ति
(D) भारतस्य

## खण्डः 'ख'

## रचनात्मक-कार्यम्

## रचनात्मक कार्य

## Writing Skills

*10 अङ्काः*

**2.** भवता/भवत्या गतसप्ताहे संसदः नवीनभवनं दृष्टम् । अस्य वैशिष्ट्यं वर्णयन्/वर्णयन्ती कुरुक्षेत्रवासिनं स्वमित्रं प्रति मञ्जूषायां प्रदत्तसङ्केतानां सहायतया पत्रमेकं लिखत ।

आपने गत सप्ताह संसद् का नवीन भवन देखा । इसकी विशेषताओं का वर्णन करते हुए मञ्जूषा में दिए गए संकेतों की सहायता से कुरुक्षेत्रवासी अपने मित्र को एक पत्र लिखिए । *5*

You have seen the new building of the Parliament last week. Write a letter to your friend who lives in Kurukshetra explaining its features with the help of the clues given in the box.

**मञ्जूषा**

| |
|---|
| प्रियमित्रम्, दिल्लीनगरम्, संसद्भवनस्य, मईमासस्य लोकार्पणम्, भूकम्परोधीतकनीकः, अक्षय-ऊर्जायाः, लोकसभायाः, विषयः, कमलम्, षड्द्वाराणि, मुख्यद्वारम् नामानि, ज्ञानद्वारम्, भवनस्य मध्ये, अहम्, सिंहाः, सन्ति, गौरवान्वितः, अनुभवामि । |

**अथवा (OR)**

स्वविद्यालयस्य छात्राणां कृते क्रीडा-उत्सवस्य आयोजनाय स्वविद्यालयस्य प्रधानाचार्यं प्रति एकं पत्रं लिखत ।

अपने विद्यालय के छात्रों के लिए क्रीडा-उत्सव के आयोजन के लिए अपने विद्यालय के प्रधानाचार्य को एक पत्र लिखिए ।

Write a letter to the Principal of your school for organizing a sports festival for the students of your school.

**मञ्जूषा**

| |
|---|
| सेवायाम्, महोदयाः, विषयः, विद्यालये, ज्ञानार्जनाय, मस्तिष्कस्य विकासः, शारीरिकं विकासम्, छात्राः, इच्छन्ति, आयोजनम्, क्रीडोत्सवस्य, भवेत्, क्रीडया व्यायामम्, अनुमतिम्, प्रदाय, भवताम्, आज्ञाकारी शिष्यः, धन्यवादाः, आवश्यकी, शारीरिकशिक्षा । |

**3.** (क) प्रदत्ततथ्यानां सहायतया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत ।
प्रदत्त तथ्यों की सहायता से निम्नलिखित विषय पर संस्कृत में अनुच्छेद लिखिए ।
Write a passage on the topic given below with the help of the given facts in Sanskrit. *5*

विषय: – 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' ।

'जननी-जन्मभूमिश्च' इत्येतयो: अभिप्राय:, एतयो: द्वयो: गरिमा, स्वदेशाय जीवनस्य त्याग:, सस्नेहं पालनम्, जन्मभूमौ, शारीरिकं मानसिकं च विकास:, एतयो: प्रति सद्भावा:, पालनपोषणविषयकं प्रतिपादनम्, प्रतिष्ठा, प्रेमनिष्ठा, उपसंहार: ।

**अथवा (OR)**

(ख) अधोलिखितवाक्येषु केषाञ्चन **पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत ।
निम्नलिखित में से किन्हीं **पाँच** वाक्यों का संस्कृत में अनुवाद कीजिए ।
Translate any **five** of the following sentences into Sanskrit. *5×1=5*

(i) वृक्ष पर अनेक पक्षी हैं ।
Many birds are on the tree.

(ii) मोहन बस से विद्यालय जाता है ।
Mohan goes to school by bus.

(iii) राकेश के चारों ओर मित्र हैं ।
Rakesh is surrounded by friends.

(iv) रमेश अपने मित्र को पुस्तक देता है ।
Ramesh gives the book to his friend.

(v) राजा अपराधी को दण्ड देता है ।
The king punishes the criminal.

(vi) उसे सच बोलना चाहिए ।
He should speak the truth.

(vii) आज सभी मित्रों ने उद्यान में गाना गाया ।
All the friends sung a song in the garden today.

## खण्डः 'ग'

## अनुप्रयुक्त-व्याकरणम् *15 अङ्काः*

## अनुप्रयुक्त व्याकरण

## Applied Grammar

**4.** अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलं प्रश्नत्रयम्)
निम्नलिखित वाक्यों में रेखांकित पदों की सन्धि अथवा सन्धि-विच्छेद करके लिखिए । (केवल तीन प्रश्न)
Write the sandhi form or disjoin the sandhi of the underlined words in the following sentences. (Only three questions) *3×1=3*

(क) योऽयमश्वः पताकेयम् अथवा वीरघोषणा ।

(ख) पादं सुमेरोरिव वज्रभिन्नम् ।

(ग) अश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते ।

(घ) अलम् चिन्तया ।

**5.** रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)
रेखांकित पदों के प्रकृति और प्रत्यय को जोड़कर अथवा विभक्त कर उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)
Select the appropriate answer by joining or disjoining the base element and the suffix element in the underlined words. (Only three questions) *3×1=3*

(i) किं वस्तु विद्वन् ! गुरवे प्रदेयम् ।

(A) प्र + दा + यत्

(B) प्र + दा + शतृ

(C) प्र + दा + क्त

(D) प्र + दा + तव्यत्

(ii) दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्त्तव्यः ।

(A) दा + क्त

(B) दा + तव्यत्

(C) यच्छ् + तव्यत्

(D) दा + यत्

(iii) सुलभसौख्यम् इदानीं बाल + त्व भवति ।

(A) बालता

(B) बालिलम्

(C) बालत्वम्

(D) बलत्वः

(iv) न ह्येवंविधमपरिचितमिह जगति किञ्चिदस्ति यथेयम् अनार्य + टाप् ।

(A) अनारी

(B) अनार्या

(C) अनार्याम्

(D) अवर्या

**6.** मञ्जूषायां प्रदत्तैः समुचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत । (केवलं प्रश्नत्रयम्)
मञ्जूषा में दिए गए समुचित अव्यय पदों से रिक्त स्थान भरकर वाक्य लिखिए । (केवल तीन प्रश्न)
Write the sentence after filling in the blanks with appropriate indeclinable words given in the box. (Only three questions) *3×1=3*

(क) महाराजं ________ कः क्षत्रियः ?

(ख) महतीयं ________ अनर्थपरम्परा ।

(ग) जात ! ________ जीव ।

(घ) वयं ________ प्रायोगिकं व्यवहारं करिष्यामः ।

**मञ्जूषा**

| |
|---|
| चिरम्, प्रति, श्वः, खलु । |

**7.** कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत । (केवलं प्रश्नत्रयम्)

कोष्ठक में दिए गए शब्दों में उचित विभक्ति का प्रयोग कर रिक्त स्थान पूर्ण कीजिए ।

(केवल तीन प्रश्न)

Fill in the blanks after applying the appropriate case-endings in the words given in the brackets. (Only three questions) *3×1=3*

(क) वित्तं _________ विना सफलं न भवति । (दानभोग)

(ख) जनो _________ राजवचनमनुगच्छति । (भय)

(ग) एष कलहंसघोषघर्घरानुनादिना _________ अनुसरति । (रामभद्र)

(घ) तस्य _________ सह अस्ति कश्चित् सम्पर्कः । (राज्य)

**8.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं विग्रहं समासं वा चित्वा लिखत । (केवलं प्रश्नत्रयम्)

निम्नलिखित वाक्यों में रेखांकित पदों के समुचित विग्रह अथवा समास चुनकर लिखिए ।

(केवल तीन प्रश्न)

Write the vigraha (the descriptive sentence) or the compound of the underlined words of the following sentences. (Only three questions) *3×1=3*

(i) अधुना तु <u>योगस्य शिक्षा</u> अतीव उपयोगिनी अस्ति ।

(A) योगशिक्षाः

(B) योगशिक्षाम्

(C) योगशिक्षा

(D) योग्यशिक्षा

(ii) कौत्साय वज्रभिन्नम् सुमेरोरिव पादं समस्तमेव दिदेश ।

(A) वज्रेण भिन्नम्

(B) वज्रस्य भिन्नम्

(C) वज्राय भिन्नम्

(D) वज्रः भिन्नः

(iii) जात ! पश्यामि ते मुखम् पुण्डरीकम् ।

(A) मुखपुण्डरीकम्

(B) मुखपुण्डरीके

(C) मुखेनपुण्डरीकम्

(D) मुखपुण्डरीक

(iv) स प्रतिमासं स्ववेतनस्य अर्धाधिकं भागं केरलं प्रेषयति स्म ।

(A) प्रति प्रति मासं

(B) मासं प्रति

(C) मासं मासं प्रति

(D) मासेन प्रति

## खण्डः 'घ'

## (i) पठितावबोधनम् — 25 अङ्काः

## पठित-अवबोधन

## Reading Comprehension

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following passage and answer the following questions in Sanskrit. *5*

तात ! चन्द्रापीड ! विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति । केवलं च निसर्गत एवातिगहनं तमो यौवनप्रभवम् । अपरिणामोपशमो दारुणो लक्ष्मीमदः इत्यतः विस्तरेणाभिधीयसे । गर्भेश्वरत्वमभिनवयौवनत्वम् अप्रतिमरूपत्वममानुषशक्तित्वं चेति महतीयं खल्वनर्थपरम्परा । यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः । नाशयति च पुरुषमत्यासङ्गो विषयेषु ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) चन्द्रापीडं कः सम्बोधयति ?

(ii) लक्ष्मीमदः कीदृशः भवति ?

(iii) विषयेषु अत्यासङ्गः कं नाशयति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) $2\times1=2$

(i) यौवनप्रभवं तमः कीदृशं भवति ?

(ii) गद्यांशे का अनर्थपरम्परा प्रतिपादिता ?

(iii) बुद्धिः कथं कालुष्यम् उपयाति ?

(इ) निर्देशानुसारम् उत्तरत । (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'बुद्धि:' इति कर्तृपदस्य क्रियापदं किम् ?

(ii) 'कोमल:' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?

(iii) 'निर्मला' इति विशेषणपदस्य विशेष्यपदं किम् ?

**10.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following poetry and answer the questions based on them in Sanskrit. *5*

तमध्वरे विश्वजिति क्षितीशं नि:शेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्स: प्रपेदे वरतन्तुशिष्य: ।।

**प्रश्ना:**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) उपात्तविद्य: क: अस्ति ?

(ii) अस्मिन् पद्ये क्षितीश: क: अस्ति ?

(iii) कौत्स: कस्य शिष्य: अस्ति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×1=2*

(i) कौत्स: कीदृशं क्षितीशम् प्रपेदे ?

(ii) कौत्स: कस्य पार्श्वे अगच्छत् ?

(iii) कौत्स: कीदृश: अस्ति ?

(इ) निर्देशानुसारम् उत्तरत । (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'प्रपेदे' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'यज्ञे' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत ।

(iii) 'अध्वरे' इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम् ?

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following part of a drama and answer the questions based on them in Sanskrit. *5*

*लव:* : (प्रविश्य, स्वगतम्) अविज्ञातवय: क्रमौचित्यात्
पूज्यानपि सत: कथमभिवादयिष्ये ? (विचिन्त्य)
अयं पुनरविरुद्धप्रकार इति वृद्धेभ्य: श्रूयते ।
(सविनयमुपसृत्य) एष वो लवस्य शिरसा प्रणामपर्याय: ।

*अरुन्धतीजनकौ* : आयुष्मान् भूया: ।

*कौशल्या* : जात ! चिरं जीव ।

*अरुन्धती* : एहि वत्स ! (लवमुत्सङ्गे गृहीत्वा आत्मगतम्) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरित: ।

*कौशल्या* : जात ! इतोऽपि तावदेहि । (उत्सङ्गे गृहीत्वा) अहो, न केवलं मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोषघर्घरानुनादिना स्वरेण च रामभद्रमनुसरति । जात ! पश्यामि ते मुखपुण्डरीकम् ।

**प्रश्ना:**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) शिरसा प्रणामपर्याय: कस्य अस्ति ?

(ii) लवमुत्सङ्गे गृहीत्वा कस्या: मनोरथ: पूरित: जात: ?

(iii) अविज्ञातवय: क: अस्ति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×1=2*

(i) अरुन्धती लवमुत्सङ्गे गृहीत्वा किं चिन्तयति ?

(ii) लव: पूज्यान् दृष्ट्वा अभिवादनविषये किं चिन्तयति ?

(iii) लव: कीदृशेन स्वरेण रामभद्रमनुसरति ?

(इ) निर्देशानुसारम् उत्तरत । (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'पश्यामि' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'कमलम्' इत्यर्थे किं पदमत्र प्रयुक्तम् ?

(iii) 'मांसलोज्ज्वलेन' इति विशेषणपदस्य विशेष्यपदं किं प्रयुक्तम् ?

**12.** अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम्) ।
निम्नलिखित वाक्यों में रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए । (केवल चार प्रश्न)
Form questions on the basis of underlined words in the following sentences. (Only four questions) *4×1=4*

(क) उपात्तविद्यो <u>कौत्स:</u> क्षितीशं प्रपेदे ।

(ख) अश्व: अधुना <u>अस्माभि:</u> स्वयं प्रत्यक्षीकृत: ।

(ग) योग: <u>कर्मसु</u> कौशलम् ।

(घ) अवधीरयन्त: खेदयन्ति हितोपदेशदायिनो <u>गुरून्</u> ।

(ङ) <u>छात्रा:</u> प्रसन्नमनसा योगस्य वैशिष्ट्यम् अवगच्छन्ति ।

**13.** अधोलिखितस्य श्लोकस्य अन्वयं लिखत ।
निम्नलिखित श्लोक का अन्वय लिखिए ।
Write the prose order of the following verse. *3*

कर्मणैव हि संसिद्धिमास्थिता जनकादय: ।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ।।

**14.** अधोलिखितस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत ।
निम्नलिखित श्लोक का भावार्थ संस्कृत भाषा में लिखिए ।
Write the explanation of the following verse in Sanskrit. *3*

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ।।

**अथवा (OR)**

'विद्ययाऽमृतमश्नुते' इति पाठस्य सारं सङ्क्षेपेण संस्कृतभाषया लिखत ।

## खण्डः 'घ'

## (ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः *10 अङ्काः*

## संस्कृत-साहित्य और इतिहास का सामान्य परिचय

## General Introduction of Sanskrit-Literature and History

**15.** अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नत्रयम्)
निम्नलिखित प्रश्नों के उत्तर दिए गए विकल्पों में से चुनिए । (केवल तीन प्रश्न)
Choose the answer from the given options of the following questions. (Only three questions) *3×1=3*

(i) 'बुद्धचरितम्' इति महाकाव्यस्य रचयिता कः ?

(A) बाणभट्टः (B) कालिदासः

(C) भारविः (D) अश्वघोषः

(ii) रघुवंशमहाकाव्ये कति सर्गाः सन्ति ?

(A) एकादश (B) पञ्चदश

(C) नवदश (D) विंशतिः

(iii) बिल्हणस्य काव्यस्य नाम किम् ?

(A) विक्रमाङ्कदेवचरितम्  (B) मेघदूतम्

(C) रावणवधम्  (D) सौन्दरनन्दम्

(iv) 'राजतरंगिणी' इति कीदृशं काव्यमस्ति ?

(A) काल्पनिकम्  (B) ऐतिहासिकम्

(C) बौद्धिकम्  (D) खण्डकाव्यम्

**16.** प्रश्नानाम् उत्तराणि प्रदत्त-विकल्पेभ्य: चित्वा लिखत । (केवलं प्रश्नत्रयम्)
प्रश्नों के उत्तर दिए गए विकल्पों में से चुनिए । (केवल तीन प्रश्न)
Choose the answer from the given options. (Only three questions) *3×1=3*

(i) 'कादम्बरी' इति कथाग्रन्थस्य रचयिता क: ?

(A) सुबन्धु:  (B) भट्टि:

(C) बाणभट्ट:  (D) सोड्ढल:

(ii) सुबन्धो: वासवदत्ताया: नायक: क: ?

(A) वसन्तक:  (B) कन्दर्पकेतु:

(C) हरिवाहन:  (D) शूद्रक:

(iii) 'उदयसुन्दरीकथा' इति चम्पूकाव्यस्य रचयिता क: ?

(A) सोड्ढल:  (B) नारायणदास:

(C) दण्डी  (D) माघ:

(iv) 'रामायण चम्पू:' इति काव्यस्य अपरं नाम किम् ?

(A) रामायणम्  (B) चम्पूरामायणम्

(C) रामायणकाव्यम्  (D) रामायणकथा

**17.** प्रदत्तविकल्पेभ्य: समुचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल चार प्रश्न)
Choose appropriate answer from the given options. (Only four questions)

*4×1=4*

(i) 'मृच्छकटिकम्' इति काव्यस्य रचयिता क: ?

(A) शूद्रक: (B) भास:

(C) कालिदास: (D) हर्षवर्धन:

(ii) आचार्यभरत: कं शास्त्रम् अरचयत् ?

(A) साहित्यशास्त्रम् (B) व्याकरणशास्त्रम्

(C) नाट्यशास्त्रम् (D) धर्मशास्त्रम्

(iii) भासस्य महाभारताधारितं काव्यं किम् ?

(A) दूतवाक्यम् (B) अभिषेकनाटकम्

(C) स्वप्नवासवदत्तम् (D) प्रतिमानाटकम्

(iv) 'विक्रमोर्वशीयम्' इति नाटकस्य नायक: क: ?

(A) अग्निमित्र: (B) पुरुरवा

(C) दुष्यन्त: (D) चारुदत्त:

(v) 'कर्णभारम्' इति नाटकस्य रचयिता क: ?

(A) भारवि: (B) दण्डी

(C) भरत: (D) भास:

## खण्डः 'ङ'

## छन्दोऽलंकारपरिचयः — *10 अङ्काः*

## छन्द और अलंकार परिचय

## Metres and Figures of Speech

**18.** (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्) *5*

निम्नलिखित प्रश्नों के उत्तर दीजिए । (केवल तीन प्रश्न)

Answer the following questions. (Only three questions) *3×1=3*

(i) 'श्लोके षष्ठं गुरुः ज्ञेयं सर्वत्र लघुपञ्चमम्' इति कस्य छन्दसः लक्षणम् अस्ति ?

(ii) वसन्ततिलकाछन्दसः उदाहरणमेकम् लिखत ।

(iii) 'मगण' इत्यस्य संक्षिप्त-चिह्नानि कानि सन्ति ?

(iv) 'उपजाति' छन्दसि प्रतिचरणं कति वर्णाः भवन्ति ?

(आ) अधोलिखितासु श्लोकपङ्क्तिषु प्रयुक्तं छन्दः परिचीय तस्य नाम लिखत । (केवलं प्रश्नद्वयम्)

निम्नलिखित श्लोक पंक्तियों में छन्द चुनकर नाम लिखिए (केवल दो प्रश्न)

Write the name of the metre in the following lines of verses. (Only two questions) *2×1=2*

(i) अस्त्युत्तरस्यां दिशि देवतात्मा

(ii) महिम्नामेतस्मिन् विनयशिशिरो मौग्ध्यमसृणो

(iii) निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ।

**19.** (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्) *5*

निम्नलिखित प्रश्नों के उत्तर दीजिए । (केवल तीन प्रश्न)

Answer the following questions. (Only three questions) *3×1=3*

(i) उपमा-अलंकारस्य लक्षणं लिखत ।

(ii) अनुप्रासालंकारस्य एकम् उदाहरणं लिखत ।

(iii) श्लेषालङ्कारस्य लक्षणं लिखत ।

(iv) '_____ अभेदो य उपमानोपमेययोः' इति कस्यालङ्कारस्य लक्षणम् ?

(आ) अधोलिखितासु श्लोकपङ्क्तिषु प्रयुक्तालङ्कारस्य नाम लिखत । (केवलं प्रश्नद्वयम्)

निम्नलिखित श्लोकपंक्तियों में प्रयुक्त अलंकार का नाम लिखिए । (केवल दो प्रश्न)

Write the figure of speech in the following lines of verses. (Only two questions) *2×1=2*

(i) यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मे: ।

(ii) पुनरपि शिशुर्भूतो वत्स: स मे रघुनन्दनो ।

(iii) रमते न मरालस्य मानसं मानसं विना ।